**संस्कृत वार्ता:**

**दिनाङ्क : 19/04/2026**

**सायम् - 06:20**

**आदौ मुख्यवार्ता:**

- प्रधानमन्त्री नरेन्द्र मोदी उक्तवान् यत् देशस्य विकासाय अधिकाधिकाः महिलाः राजनीतौ आगच्छेयु: । अपि च प्रोक्तवान् यत् भारतीय-जनता-पार्टीति दलम् इदानीं महिला-सशक्तिकरणस्य पर्यायः अस्ति।

- पश्चिमबङ्ग-तमिलनाडुराज्ययो: निर्वाचनप्रचार:सजवं-प्रचलत: । विभिन्नदलानां नेतारः मतदातॄन् आकर्षयितुं निरन्तरं सभाः कुर्वन्ति।

- भारतेन श्रीलंकादेशेन सह द्विपक्षीयसहयोगं सुदृढ़ीकर्तुं 'पड़ोसी प्रथम' इति नीतौ प्रतिबद्धतां प्रकटयता पारस्परिक-विकासार्थं निरन्तर-सहयोगस्य आवश्यकतां प्रतिपादितम्।

- वार्षिकी चतुर्धामयात्रा अद्य उत्तराखण्डे प्रारब्धा। अक्षयतृतीयायाः शुभावसरे यमुनोत्री गङ्गोत्री चेति धामद्वयस्य कपाटानि उद्घाटितानि। ।

- **अपि च**

- आई.पी.एल क्रिकेट क्रीडायां अद्य पंजाब किंग्स दलम्, लखनऊ सुपर जॉयंट्स दलम् सम्मुखी करिष्यति। इयम् स्पर्धा सार्ध सप्तवादने आरप्स्यते।

**अथ वार्ता: विस्तरेण**

**निवार्चन प्रचार:**

प्रधानमन्त्री नरेन्द्र मोदी उक्तवान् यत् देशस्य विकासाय अधिकाधिकाः महिलाः राजनीतौ आगच्छेयु: । श्रीमोदी अद्य बाँकुरा-जनपदस्य विष्णुपुर-नगरे आयोजिते जनसभायां आरोपितवान् यत् तृणमूल कांग्रेस दलं नवत्रिंशदधिकद्विसहस्र तमेवर्षे महिला-आरक्षण-विधेयकस्य पारणं निरोद्धुं कांग्रेसदलेन सह संयुता आसीत्। स: सबलं प्रतिपादितवान् यत् भारतीय-जनता-पार्टीति दलम् इदानीं महिला-सशक्तिकरणस्य पर्यायः अभवत्, अपि च तेषां सुरक्षायप्रतिबद्ध:अस्ति ।

**बाइट – पीएम - महिला आरक्षण – 38 से.**

प्रधानमन्त्री आरोपितवान् यत् तृणमूल कांग्रेसदलम्  तथा कांग्रेसदलम् उभे  आदिवासीजनानां विरोधिनौ स्तः। तेन उक्तं यत् राष्ट्रपतेः चयनसमये उभाभ्यां दलाभ्यां द्रौपदी मुर्मुः विरुद्धं प्रत्याशी स्थापितः आसीत्। श्रीमोदी आरोपितवान् यत्  तृणमूल कांग्रेस दलस्य शासनकाले पश्चिमबङ्ग-राज्यस्य जनानां मध्ये भयस्य वातावरणं निर्मितमासीत्। तेन उक्तं यत् जनाः अधुना भारतीय जनता पार्टीति दलम्  प्रति विश्वासं प्रदर्शयन्ति। पश्चिमबङ्गे तृणमूलकाङ्ग्रेसदलस्य अध्यक्षा तथा पश्चिमबङ्गस्य मुख्यमन्त्री ममता बनर्जी हुगली-पूर्वबर्धमान-जनपदयोः दलस्य प्रत्याशिनां समर्थनार्थं जनसभाः कृतवती। ममता बनर्जी भारतीयजनतापार्टीतिदलम्  प्रति जनान् भ्रमयितुम् आरोपितवती। भारतीयजनतापक्षस्य नेता त्रिपुराराज्यस्य मुख्यमन्त्री मानिक साहा मुर्शिदाबाद-जनपदस्य जियागंज-कांदि-स्थानेषु मार्गप्रदर्शनेषु सहभागं कृतवान्। काङ्ग्रेसदलम्, वामपन्थिदलानि अन्यानि च राजनैतिकदलानि अपि स्वप्रचारं तीव्रं कृतवन्तः।

**शाह – तमिलनाडु**

तमिलनाडुराज्ये भारतीयजनतापार्टीति दलस्य  वरिष्ठनेता तथा केन्द्रीयगृहमन्त्री अमित शाहः इरोड-जनपदस्य शिवगिरि-मोडक्कुरिची-स्थानयोः निर्वाचनप्रचारं कृतवान्। सः अवदत् यत् राज्ये ए.आई.ए.डी.एम.के-दलस्य महासचिवः एडप्पाडी के. पलानीस्वामी-नेतृत्वे एनडीए-संघटनं सुदृढं सफलं च अस्ति। सः डीएमके-प्रशासनस्य निष्क्रियतां जनकल्याणस्य उपेक्षां च आलोचितवान्। नमक्कल-स्थाने प्रचारं कुर्वन् ए.आई.ए.डी.एम.के-दलस्य महासचिवः एडप्पाडी के. पलानीस्वामी अवदत् यत् सत्ता प्राप्ते सति तस्य दलं कृषकेभ्यः चतुर्दशशतयूनिटमितं विद्युतं निःशुल्कं प्रदास्यति।

**उपराष्ट्रपतिः श्रीलंका**

भारतस्य उपराष्ट्रपतिः सी. पी. राधाकृष्णन् द्विदिवसीयायाः  आधिकारिकयात्रायाः कृते  कोलंबो नगरे सम्प्राप्तः। अद्य सः कोलंबोस्थिते राष्ट्रपति-सचिवालये अनुरा कुमार दिसानायके इत्यनेन सह मेलनं कृतवान्। उभौ नेतारौ भारत-श्रीलंका-देशयोः मध्ये इतिहासस्य तथा सांस्कृतिक-सम्बन्धानां दृढ-आधारे स्थापितानां  सम्बन्धानां अधिक-सुदृढीकरणार्थं विस्तृतां सार्थकां च चर्चाम् अकुरुताम्। उपवेशनेस्मिन्  श्री राधाकृष्णन्  भारतस्य 'पड़ोसी प्रथम' इति नीतौ प्रतिबद्धतां प्रकटयता पारस्परिक-विकासार्थं निरन्तर-सहयोगस्य आवश्यकतां प्रतिपादितवान्। एषा यात्रा उभयोः-देशयोः मध्ये द्विपक्षीयानां-सम्बन्धानां निरन्तर-प्रगतिं प्रदर्शयति।

**विराम**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।**

**सर्वोच्च न्यायालयः -मार्ग सुरक्षा**

सर्वोच्च न्यायालयः देशे सर्वत्र मार्ग सुरक्षां संवर्धयितुं निर्देशान् प्रख्यापितवान्। न्यायालयः उक्तवान् यत् प्राशासनिकदोष अथवा आधारभूतसंरचनायाः अभावेन च सुदीर्घ-मार्गाः संकट-मार्गाः न भवेयुः इति।

न्यायमूर्तिः जे.के. माहेश्वरी तथा च ए.एस. चंदुरकर चेत्येतयोः पीठेन उक्तम् यत् भारतस्य समग्र मार्ग जाले केवलं द्वे प्रतिशतं भागः राष्ट्रियराजमार्गाणां वर्तते , परञ्च मार्ग दुर्घटनासु मृत्युंगतानां प्रायः त्रिंशत् प्रतिशतं भागः तेषामेव अस्ति। न्यायालयः अपि अवदत् यत् राजमार्गे असामयिक दुर्घटनायां एकस्यापि जीवस्य नाशः राज्यस्य विफलतां सूचयति। पीठेन सर्वेषां राज्यानां केन्द्रशासितप्रदेशानां चेत्यादीनां राजमार्गाणां उन्नयनार्थं शीघ्रं उपायान् कर्तुं निर्देशाःअपि प्रदत्ताः।

## ऋतु विज्ञान विभाग

ऋतु विज्ञान विभागेन पूर्वीय- राजस्थान, पूर्वीयउत्तरप्रदेश, झारखण्ड-ओडिशा चेत्यादिषु राज्येषु श्वः दिवसे ऊष्ण-लहर्याः सम्भावना प्रकटिता। अनेन विभागेन आगामिनोः द्वयोः दिवसयोः तटीय-आन्ध्रप्रदेशे, तटीय-कर्णाटके, तमिलनाडु, पुदुच्चेरी कराईक्कल चेत्यादिषु क्षेत्रेषु उष्ण-आर्द्र-युक्तस्य सम्भावना अपि सूचिता। अरुणाचलप्रदेशे, असमे तथा मेघालये च एप्रिल मासस्य द्वाविंशतिः दिनांक पर्यन्तं तीव्र-वृष्टेः सम्भावना अस्ति। उत्तरीय आन्तरिक-कर्णाटके आगामिनोः द्वयोः दिवसयोः गर्जन-विद्युत्सहितं हिमपातःअपि सम्भाव्यते।

## अक्षय तृतीया

अद्य समग्रे देशे अक्षय तृतीया-पर्व उत्साहेन आचर्यते। एषः पर्व सौभाग्यस्य सफलतायाश्च प्रतीकः अस्ति। अस्मिन् दिने जनाः देवताभ्यः सौभाग्यप्राप्तये प्रार्थनां कुर्वन्ति। प्रधानमन्त्री नरेन्द्र मोदी अक्षयतृतीयायाः अवसरे नागरिकेभ्यः शुभाशंसाः प्रेषितवान्। सामाजिकमाध्यमेषु एकस्मिन् लेखे प्रधानमन्त्रिणा उक्तं यत् अयं उत्सवः पुण्यकर्मणां दानस्य सेवायाश्च मार्गे चलितुं प्रेरयति। श्रीमोदी कामनां कृतवान् यत् अयं पर्वः सर्वेषां जीवने सुखं समृद्धिं च उत्तमं स्वास्थ्यं च आनयतु। अद्य समग्रे देशे परशुराम जयंती अपि आचर्यते। भगवान् परशुरामः श्रीविष्णोः षष्ठः अवतारः अस्ति। अस्मिन् अवसरे प्रधानमन्त्रिणा कामना कृता यत् अद्वितीयपराक्रमस्य ज्ञानस्य च प्रतीकस्य भगवतः परशुरामस्य कृपा प्रत्येकस्य हृदये नूतनां ऊर्जां आत्मविश्वासं च पूरयतु। सः अवदत् यत् भगवतः परशुरामस्य आशीर्वादः प्रत्येकं जीवनं सुखेन शान्त्या समृद्ध्या च आलोकयतु।

## आईपीएल-क्रिकेट

आई.पी.एल. क्रिकेट्-क्रीडायां अद्य कोलकाता-नाइट-राइडर्स, राजस्थान-रॉयल्स दलयोः मध्ये स्पर्धा प्रचलति। प्रप्रथमं क्रीडयता राजस्थान-रॉयल्स दलेन कोलकाता-नाइट-राइडर्स दलाय षड्पञ्चाशदधिक[illegible]शतधावनांकां लक्ष्यं समुपस्थापितम्। अपरतः द्वितीयाम् स्पर्धायाम् चण्डीगढ़ नगरे पंजाब-किंग्स दलम्, लखनऊ-सुपर-जॉयंट्स दलम् सम्मुखी करिष्यति। इयम् स्पर्धा सार्ध सप्तवादने आरप्स्यते।

**॥ इति वार्ताः ॥**